**दिनाङ्क :-26.02.2025**

**प्रात: - 06:55**

**महाकुम्भ:**

पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य महाकुम्भमेलापकस्य अद्य प्रयागराजे महाशिवरात्रिमहोत्सवस्य अवसरे समापनं भविष्यति। अद्य प्रातः प्रयागराजस्य संगमक्षेत्रे अन्येषु घाटेषु च श्रद्धालवः पवित्रावगाहनं कुर्वन्तः सन्ति। जनवरी मासस्य त्रयोदश दिनाङ्के समारब्धेस्मिन् महाकुम्भमेलापके षट् सप्ताहेषु साम्प्रतं यावत् चतुष्षष्ठी कोटितोप्यधिकाः आगन्तुकाः भागं भाजितवन्तः, येन इदं मेलापकम् विश्वस्य मानवानां बृहत्तमः समागमः अस्ति। महाशिवरात्रिः शिव-पार्वत्योः दिव्य-संयोगं प्रतिबिम्बयति, कुम्भ-मेलापकस्य सन्दर्भे च अस्य महत्त्वं विशिष्टं वर्तते। महाकुम्भनगरे, विभिन्नघाटेषु च जनसमूहानां निरीक्षणं सुरक्षाकर्मचारिणः सतर्कतया कुर्वन्तः सन्ति। रेलस्थानकेषु, मार्गेषु, नगरस्य प्रवेशस्थानेषु च नित्यं भक्तानां प्रवाहः दृश्यते ।

**प्रधानमन्त्रिणा-असम यात्रा**

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् वैश्विक-अनिश्चिततायाः वातावरणे अपि विश्वस्य सर्वे विशेषज्ञाः भारतस्य द्रुतवृद्धौ निश्चिताः सन्ति। गत अपराह्णे गुवाहाट्यां एडवांटेज असम 2.0 निवेशावसंरचना शिखर सम्मेलनस्य उद्घाटनसत्रं सम्बोधयता प्रधानमन्त्रिणा प्रतिपदितं यत् भारतस्य विकासे विश्वासः अस्य विशालः युवानः सन्ति, ये अतीव द्रुतगत्या कुशलाः भवन्ति, नवाचाराणां च नेतृत्वं कुर्वन्तः सन्ति। अनन्तरं 'विकसितभारताय असमस्य अर्धचालकक्षितिजेत्यस्य उन्नतिः' इत्यस्मिन् विषये सत्रं सम्बोधयन् केन्द्रीयसूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् असमराज्यं भारतस्य विकासे अग्रणी भविष्यति, प्रशासनम् अस्य क्षेत्रस्य विकासाय कार्यं कुर्वन् अस्ति।

**अमितशाह-तमिलनाडुः**

केन्द्रीय गृहमन्त्री अमितशाहः गतरात्रौ तमिलनाडुराज्यस्य कोयम्बटूर-नगरे संप्रप्तवान्। तस्य स्वागताय केन्द्रीयराज्यमन्त्री डॉ. एल.मुरुगानः तथा च राज्यस्य भाजपेति दलस्य नेतारः उपस्थिताः आसन् । श्रीशाहः अद्य कोयम्बटूरनगरे भाजपेति दलस्य कार्यालयस्य उद्घाटनं करिष्यति, रात्रौ च कोयम्बटूर-नगरस्य समीपे ईशा-केन्द्रे शिवरात्रि-उत्सवे भागं अपि भजिष्यति ।

**ई�ीएफओ-सदस्याः**

कर्मचारी भविष्यनिधिसङ्गठनेन गतवर्षस्य दिसम्बरमासस्य कालखण्डे षोडश-लक्षाधिकाः सदस्याः योजिताः। चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य नवम्बर मासस्य तुलनायां एतत् नव दशमलव षड् नव प्रतिशतं वृद्धिं प्रदर्शयति ।श्रम-जीविकामन्त्रालयस्य अनुसारं अष्टादश तः पञ्चविंशतिः आयुवर्ग पर्यन्तं पञ्चासीति सहस्राधिक चतुर्लक्षं यावत् नवीनाः सदस्याः नियोजिताः ।

**रूस/ �ुतिनः**

रूसदेशस्य राष्ट्रपतिः व्लादिमीर् पुतिनः उक्तवान् यत् यूक्रेनदेशस्य दुर्लभखनिज क्षेत्रेषु रूसस्य स्वामित्व-भागे अमेरिकादेशाय प्रवेशं प्रदातुं सज्जः अस्ति। राष्ट्रपतेः डोनाल्ड ट्रम्पस्य नेतृत्वे अमेरिकादेशः युक्रेनदेशं प्रदत्त समर्थनस्य विनिमयरूपेण तस्य खनिजसम्पदां प्राप्तुं सन्धिः कुर्वन् अस्ति।

**क्रिकट**

पुरुषाणां आईसीसी चैंपियन्स ट्रॉफीति क्रिकेट्-क्रीडायां अद्य अपराह्णे पाकिस्तानस्य लाहौरनगरस्य गद्दाफी-क्रीडाङ्गणे इङ्ग्लैण्ड्-दलम् अफगानिस्तान-दलं सम्मुखी करीष्यति। क्रीडायाः आरम्भः मध्याह्ने सार्द्ध द्विवादने भविष्यति।

**क्रिकट/महिलाप्रीमियरलीग**

महिलाप्रीमियरलीग इत्यस्यां क्रिकेट्-क्रीडा-प्रतिस्पर्धायाम् गतसायं बेङ्गलूरुनगरस्य एम.चिन्नास्वामी-क्रीडाङ्गणे दिल्ली-कैपिटल्स-दलेन गुजरात-जायंट्स-दलं षड् स्तोभैः पराजितम्। अद्य अस्मिन्नेव क्रीडाङ्गणे यूपी-वॉरियर्स-दलं मुम्बई-इंडियन्स-दलं सम्मुखी करिष्यति, क्रीडायाः प्रसारणं सायं सार्द्ध-सप्तवादने भविष्यति।

**।। इति वार्ताः।।**